Ishita Dey

Semester - II

Core course - 4



## Section - A Gita

श्रीमद्भगवद्गीता भारतीयसंस्कृतेः प्राणभूता, गुणगौरवस्य वरीवर्ति। इयं गीता सर्वासामपि उपनिषदां सारभूता वर्तते। ग्रन्थोऽयं पञ्चमवेदस्वरूपस्य महाभारतस्य अंशभूतः वर्तते। गीतायाः भारतीयदर्शनग्रन्थेषु मूर्धन्यं स्थानं विद्यते। श्रीमद्भगवद्गीतायाः आधारशिला श्रुतिमूलकतत्त्वज्ञानं वर्तते। श्रुतीनां स्मृतीनां सर्वोपनिषदां सकलशास्त्राणां च सारभूतं तत्त्वं गीतायां रमणीयतया प्रस्तुतम्। ज्ञानगरिमान्विता गीता खलु आत्मनः स्वरूपं अवबोधयति, स्थितप्रज्ञतां शिक्षयति, निष्कामकर्मयोगं निपादयति, यज्ञादीनां महत्त्वं निरूपयति, वर्णाश्रमधर्मं प्रकाशयति, ज्ञानयोगमुद्भावयति, भक्तियोगं ज्ञापयति, भगवत् विराट्रूपं च उद्घाटयति। अस्यां गीतायां सर्वोपनिषदां सारः मनोज्ञया प्रणाल्या साधुतरं विविच्यते। योगेश्वर श्रीकृष्णः गीता सामग्र्यस्यापि वाङ्मयस्य सारम् उपस्थापयति।

श्रीमद्भगवद्गीतायां बहवः कल्याणकराः मोहाज्ञानविनाशकाः सत्यस्वरूपाः उपदेशाः भगवता प्रतिपादिताः। यथा - आत्मनः अजरत्वम् अविनाशित्वं च वर्तते। अयमात्मा न कदाचित् जायते नैव च म्रियते, न भूतकाले कदाचित् उत्पन्नः आसीत् नैव भविष्यत्काले न उत्पत्स्यति, अयं अजः नित्यः शाश्वतः, पुराणः अस्ति। एवञ्च देहे हन्यमानेऽपि अयं केनचित् न हन्यते। आत्मनः अजरत्वम् अविनाशित्वं च माधुर्येण प्रस्तूयते। ज्ञानस्य माहात्म्यमपि ज्ञानमेव सर्वश्रेष्ठं मोक्षसाधनं वर्तते।